# अद्यतनयुगे न्यायवैशेषिकयोः प्रासङ्गिकत्वम्

[१] **शम्भू राम,** [२] **नीतीश शर्मा**
[१, २] **शोध–छात्र संस्कृत विभाग,**
**जम्मू विश्वविद्यालय, जम्मू** १८०००६
Email: sharmasam918@gmail.com

***शोधसारांशः*** *भारतीयदर्शनधारा वेदेषु आस्थां दधत्यपि स्वतन्त्रतो विकसिता। दार्शिनकाचार्यैः जगतो मुक्तेरुपायानां ज्ञानात्पूर्वं जगतो वास्तविकता विश्लेषणमेवोपादेयं दृष्टम्। जीवजगदीश्वरमध्ये प्रधानतो जगद् एव। जगति श्रेय–प्रेयश्च द्वौ मार्गाविह प्रसृतौ तस्य आवश्यक्ताश्च अपि द्विविधा भवतः– लौकिक्यः; अलौकिकयोः वा। आन्वीक्षिकी विद्या दर्शनशास्त्रस्य तत्रापि च न्यायस्य पर्यायभूता प्रतीयते। न्यायवैशेषिकयोर्मूलं स्वरुपं सर्वथा वर्तमानकालिक्या वैज्ञानिकप्रवत्तेरनुकूलमेव वर्तते। आधुनिके तर्कप्रधाने वैज्ञानिके काले यदा प्रमाणैबिना न किंचिद कस्मैश्चिद् व्याख्यायितुं शक्यं तदा अनयोः प्रमाणपरा पद्धतिः सर्वथा औपयिकी तथा प्रासङ्गिकी च नास्त्यत्र सन्देहावसरः। शोधपत्रे अस्मिन् न्यायवैशेषिकयोःसाम्प्रतिके काले युगे वा का उपयोगिता तयोः किम् महत्त्वं च अस्ति इति विषये चर्चा वर्तते।*

***कूटसंख्याः*** *श्रेयः प्रेयश्च, आर्ष, परमाणुवादः, आन्वीक्षिकी, न्याय, प्रमाणशास्त्रम्, प्रमेयशास्त्रम्, उद्देश्य, लक्षण, परीक्षा, आचारमीमांसा, अपवर्ग, असत्कार्यवाद, अद्वैतवादः।*

## भूमिकाः

भारतीयदर्शन परम्परायां न्यायवैशेषिकावन्यतमं स्थानं भजेते। इयं दर्शनधारा वेदेषु आस्थां दधत्यपि स्वतन्त्रतो विकसिता, अनया च अस्मद् दृश्यजगतः परम् आध्यात्मिकसमस्यानां समाधानमस्यैव परिदृश्यमानस्य विश्वस्य सत्तां वास्तविकीमवधार्य तस्य व्याख्या श्रेयस्करीति मता। न्यायवैशेषिकाचार्यैः जगतो मुक्तेरूपायानां ज्ञानात्पूर्वं जगतो वास्तविकता विश्लेषणमेवोपादेयं दृष्टम्। अनया दृष्ट्या विचारशास्त्रे न्यायवैशेषिकयोर्योगदानमतीव मौलिकं महत्त्वपूर्णं चास्ति, यतोहि जीवजगदीश्वरमध्ये प्रधानतो जगत् एव व्याख्यानं, तत्समबद्धत्यैव च जीवेश्वरयोर्विवेचने संवृत्तमत्र, अतो नास्तीयमध्यात्मविद्या अपितु प्रमाणविद्या भूतविद्या च वर्तते।[१]। इत्थं न्यायवैशेषिकयोर्न केवलं शास्त्रस्य,अपितु विज्ञानस्य अपि प्रवृत्तिसंलक्ष्यते, एतदेवानयोर्वैशिष्ट्यम्।

प्रेयः श्रेयश्च द्वौ मार्गाविह जगति मानवसमक्षं प्रसृतौ तस्य प्रवृत्तयः आवश्यक्ताश्च द्विविधा भवन्ति–**लौकिकयः, अलौकिकयोः** वा। त्ऱ्त्र च लौकिकीनां प्रवृत्तीनां सन्तुष्टिविज्ञानेन, अलौकिकानां च दर्शनशास्त्रेण संपद्यते। कौटिलीयेर्थशास्त्रे यश्चतस्त्रो विद्याः[२] परिगणिता तासु त्रयी, वार्ता, दण्डनीतिश्चेति तिस्त्रो विज्ञानेन समकक्षः कथयितुमं शक्यन्ते परं चतुर्थी आन्वीक्षिकी विद्या दर्शनशास्त्रस्य तत्रापि च न्यायस्य पर्यायभूता प्रतीयते या लौकिकीभ्यःआवश्यक्ताभ्यः परं मानवजीवनस्य अलौकिकादर्शपूर्त्यापि संपृक्ताऽस्ति। सेयमान्वीक्षिकी न्यायविद्या वा इत्थं प्रशंसिताऽचार्येण–

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता।।**[३]

नेदं वचो न्यायशास्त्रस्य मिथ्याप्रशंसापरम्। अनेनोद्घाटितं न्यायशास्त्रस्य वैशिष्ट्यमवितथतेव तेन् सह अभ्युदयोपि लक्ष्यरूपेण प्रतिपादितः तत्र अभ्युदयस्यावाप्त्यै त्रयी वार्ता दण्डनीतिश्चेति तिस्त्रो विद्या हितकारिण्यः परं निःश्रेयसाधिगमस्तु[४] आन्वीक्षिक्या न्यायविद्ययैव वा सुशकः नास्त्यत्र सन्देहावकाशः।

**नियमेन ईयते** इति न्याय शब्दस्य निरुक्तिः परं दर्शनक्षेत्रे तु नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः कथ्यते। न्याय भाष्यकारो वात्स्यायनस्तु प्राह –

**कः पुनरयं न्यायः? प्रमाणैर्थपरीक्षणं न्यायः। प्रत्यक्षागमाश्रितमनुमानं साऽन्वीक्षा। प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा, तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या, न्यायशास्त्रम् इति।**[५]

तर्केण विषयानुसन्धानमन्वीक्षा कथ्यते तया समेकिता विद्या आन्वीक्षिकी नाम्ना प्रवृत्ता। आन्वीक्षिक्या न्यायशास्त्रस्य वा अध्यनेन वादकलापाटवं प्राप्यते अतेवयं **"वादविद्यापि"** कथ्यते। न्यायदर्शने प्रमाणस्यैव सर्वोपरि महत्त्वमस्ति अतोऽअस्य **प्रमाणशास्त्रं** संज्ञा अपि भवति। प्रमाणैस्साध्यसिद्धौ हेतुरेव क्षमः अतैव हेतुविद्या अप्यभिधीयते। श्रुतिवचनैस्सह तर्कमपि महत्त्वपूर्णमाकलयच्छास्त्रमिदं **तर्कशास्त्रम्** नाम्नाऽपि उल्लिख्यते। तदिदं न्यायशस्त्रं महर्षिणां गौतमेन जगतो

विविधाभिर्यातनाभिः सन्त्रतस्तस्य प्राणिवर्गस्य कल्याणार्थं विरचितम् यथाह गङ्गेशोपाध्यायः **अथ जगदेवं दुःखपंकनिमग्नमुद्दिधीर्षुः अष्टादश विद्यास्थनेष्वभयहिततमान्वीक्षिकीं परमकारूणिको मुनिः प्रणिनाय** वैशेषिक इति पदं विशेषाद्वयुत्पन्नं अस्य नाम्नः आधारश्चायं विश्वासो यद्विश्वेषामपि तेषां वास्तविकं स्वरूपम्। वैशेषिक दर्शनेनास्य दृश्यमानस्य जगतस्सप्तसु पदार्थेषु वर्गीकरणं विहितमस्ति। सप्तानामेतेषां पदार्थानां समग्रं विश्लेषणं दार्शनिकक्षेत्रेऽप्रतिम एव प्रयोगः वस्तुतत्वस्य भावो अभावश्च सर्वमपि तेषु निहितम्। तेभ्यः सप्तेभ्यःपरं न किंचित् प्रतिपाद्यमवशिष्यते इदमवधारणमेव वैशेषिकस्य वैशिष्ट्यावहम्। न्यायवैशेषिकौ बाह्यार्थवादि वस्तुवादि अनुभववादि अनेकतत्वादि रूपेण च प्रथितौ स्तः। अनुभवस्य याथार्थ्ये तौ दृढं विश्वसितः। तयोर्मूलं प्रतिपादनन्तु इदमेव यज्जगति वयं यान्विषयानुभवामः ते वस्तुतः सत् रूपेणावतिष्ठन्ति किंवा बाह्यवस्तूनां वास्तविकतां विज्ञातुमस्माकमनुभव एवैकं प्रमाणं **संविदेव भगवती वस्तूपगमे नः शरणम्।**[६]

न्यायवैशेषिकयोर्मूलं स्वरूपं सर्वथा वर्तमानकालिक्या वैज्ञानिकप्रवृत्तेरनुकूलमेव वर्तते। न तत्र कश्चन् विषयो निराधारं कल्प्यन्ते, न वा निर्मूलं निराक्रियते, सर्वमपि अनुभवाधारेण युक्तिपूर्वकं विव्रियते। दैनन्दिने अनुभवे वयं जगतोऽनन्तानि वस्तूनि लभामहे, अनुभवविषयत्वेनैव तानि सर्वाणि सद्रपेणावस्थितानि इत्यमेव न्यायवैशेषिकयोः प्रथमः प्रकल्पः **न चाविषया काचिदुपलब्धिः**[७]। अनन्तरं तेषामनन्तानां वस्तूनां व्यक्तिशो विज्ञानसम्भाव्यमिति कृत्वा केषाचनान्तर्गूढःसाम्यानामाधारेण दार्शनिकास्तान् वर्गीकुर्वन्ति। एते वर्गा एव न्यायवैशेषिकयोः पदार्थाः इति अभिधीयन्ते। न्यायसूत्रकारेण गौतमेन **प्रमाण प्रमेय,संशय,प्रयोजनादीनांषोडशपदार्थानां** [८]

तत्वज्ञानं निःश्रेयससाधनमुक्तम् वैशेषिककारेण कणादमुनिना च **द्रव्यं, गुण, कर्म, सामान्य, विशेष, समवायानां षट्पदार्थानां।**[९]

परवर्तिनि काले अभावस्यापि तत्र समावेशात् वैशेषिकन्ये सप्तानां तत्वज्ञानं निःश्रेयस्हेतुः कथितम्। अत्रेदमुल्लेख्यं यन्नयायसम्मतः षोडशपदार्थाः बुद्धिगतः विवेच्यविषयास्सन्ति, परं वैशैषिकाभिमतः सप्त पदार्थास्तावत् सत रूपेणावतिष्ठन्ति न केवलं बौद्धिकवैचारिकरूपेण वा। एतदप्यवधेयं यद्गौतम कणादश्च स्वस्व दर्शनस्यारम्भं दर्शनशास्त्रस्य जटिलाभि ग्रन्थिभिर्न कुरूतः तेषु च अध्यात्मिकं भौतिकं विश्वं समग्रस्य विद्यायाः क्षेत्रं समाविशतः न्यायवैशेषिकौ परस्परं समानतन्त्ररूपेण स्वीक्रियेते यतो हि न्यायो मुख्यतः ज्ञाने ज्ञानसाधनेषु च बलमादधति परं वैशेषिकैस्तु ज्ञानस्य विषयाः प्रमेयः वा प्रमुखतो विचार्यन्ते। प्रकारान्तरेण न्यायः प्रमाणशास्त्रं वैशेषिकस्य प्रमेयशास्त्रं कथितुम् शक्येते। पश्चादभाविनी युगे वैशेशिकैर्न्यायस्य प्रमाणपरीक्षणं न्यायाचार्यैस्तु वैशेषिकस्य पदार्थपरीक्षणमङ्गीकृतम् अतो द्वावेव परस्परं पूरकत्वं गतौ, अन्योन्यस्य महत्वाधायकौ चाभवताम्। वैशेषिकस्योत्कर्षश्चेद वैचारिकवैशेष्टि्येनासीत् तर्हि विषय प्रतिपादन प्रणाली वैशेष्टियं न्यायदर्शनस्याद्वितीयं तत्त्वमासीत्, यस्य प्रयोगो न्यायसिद्धान्तानामेव खण्डनार्थं प्रतिपक्षिभिः आचार्यैरपि विहितः किमतः परं न्यायशास्त्रस्योपादेयत्वसाधकं भवेत् ? तदित्थं प्रमाणप्रमेययोर्द्वयोरेव पक्षयोस्समन्वितेन विकासेन न्यायवैशेषिकौ न केवलं भारतीयदर्शनस्येतिहासे प्रचुरं योगदानमकुरूताम् परम् अद्यत्वे अपि चिन्तनप्रणाली प्रकृष्टां विधत्तः।

वैशेषिकाचार्यानां पदार्थेषु वा भृशं महत्त्वमादधति न्यायाचार्यस्तूद्घोषयति यत् पदार्थानां सम्यग्बोधः शुद्धसाधनैबिना नहि सम्भवति **प्रमाणान्तरेण नार्थप्रतिपत्तिः। नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम् अर्थवति च प्रमाणेव प्रमाता, प्रमेय प्रमितिरित्यर्थवन्ति भवन्ति।**[१०]

साम्प्रतिके तर्कप्रधाने वैज्ञानिके युगे यदा प्रमाणैबिना न किंचिद कस्मैचिद् व्याख्यायितुं शक्यं तदा न्यायवैशेषिकयोरियं प्रमाणपरा पद्धतिः सर्वथा औपयिकी प्रासङ्गिकी च नास्त्यत्र सन्देहावसरः। कस्यापि शास्त्रस्य विज्ञानस्य वा मूले जिज्ञासा संशयः च भवतः। इदमपि न्यायशास्त्रस्य माहात्म्यं यदत्र प्रमाणप्रमेयाभ्यां परं संशय एव सर्वोपरि उद्दिष्टः यथाह भाष्यकारः–

**नानुपलब्धे न निर्णीतेर्थे न्यायः प्रवर्तते । किं तर्हि ? संशयितेऽर्थे**[११]

संशये समुद्भूते सति प्रमाणावसरो भवति प्रमाणैर्विषयं विज्ञाय संशयो निवर्तन्ते ज्ञानं च समुदेति, अयमेव ज्ञानप्राप्तेः प्रकारो न्यायदर्शने प्रस्तुतः प्रचारितश्च यः सम्प्रत्यपि प्रासङ्गिक एवासन्दिधम्। संशयेनैव खलु प्रमातुरात्मनोस्तित्त्वमपि निश्चेतुं शक्यते अपि च पाश्चात्यचिन्तनेन सह तुलनायां कृतायां संशयस्य ततश्च न्यायदर्शने साम्प्रतिकं महत्त्वमवधार्यते। ज्ञानप्रकटनायापि न्यायदर्शनं व्यवस्थितायाः क्रमबद्धायास्तर्काश्रितायाश्च शैल्या[१२] निरूपणं करोति–**त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो , लक्षणं परीक्षा चेति** [१३]

यद्यप्यवान्तरकाले नव्यन्यायाचार्यानामतिदुर्बोध शैल्या सांख्य वेदान्तयोश्च विकसितया अध्यात्मिकया विचारधारया न्यायवैशेषिकयोर्महत्त्वं तनिमानमभजत तथापि साम्प्रतिके तयोरध्ययनं विश्लेषणंच पुनरपि प्रासङ्गिकतामपन्नम्। न्यायदर्शनस्य चिन्तनपद्धत्या मौलिकीभ्यास्स्थापनाभ्यश्च भारतीयं दर्शनं तथा प्रभावितमासीद्यथा न्याय इति न केवलमेकस्य

दर्शनप्रस्थापनस्य परं चिन्तनस्य प्रत्येकं वैज्ञानिक्यातर्कसङतायाश्च पद्धतेः नाम्ना रूढो अभवत् विविधेषु च दर्शनप्रस्थानेषु वैदिको न्यायः बौद्धन्याय, जैनन्यायः च आदीनि नामानि प्रचलितानि। प्रायशः सर्वाणि आस्तिकभारतीयदर्शनानि वेदमीश्वरं वा आदावेव स्वीकृत्य प्रवर्तते तेष्वपि द्वे पूर्वोत्तरमीमांसे तु आप्तवचनं श्रुतिप्रमाणेव सर्वोपरि मन्येते न तर्काय श्रद्धतः परं न्यायवैशेषिकौ तु तत्रापि विलक्षणौ स्तः तावपि श्रुतिं प्रमाणत्त्वेनाद्रियन्ते आप्तवचनं च तेभ्यः अपि श्रद्धेयानि, किन्तु तदेव सर्वमिति न ताभ्यां सत्यम। तौ तु तर्कपूर्वकं स्वपक्षमुपस्थापयतः अयमेव तयोर्विशेषं तौ वेदवचनैस्सह तर्कमपि प्रमाणत्वेन ग्रहणीतः

विश्वसितश्च–

**आर्षं धर्मोपदेशञ्च वेदशास्त्रविरोधिता।**
**यस्तर्केणानुसन्धते स धर्मं वेद नेतरः।।**[१४]

आर्षं खलु चतुदर्शविणानां मण्ये न्यायशास्त्रस्यपि गणना कृता न्यायदर्शनन्तुं भारतवर्षे तर्कशास्त्रस्यादिमो प्रवर्तकः व्यवस्थितविचार पद्धतैश्चाविष्कारकः इत्यैवास्योपादेयत्त्वम। अद्यत्वे अपि न्यायदर्शनस्येयं वैज्ञानिकी तर्कपद्धतिः महत्त्वं भजत एव। दर्शनशास्त्रस्य गूढसिद्धान्तानां प्रकटनाय जनसाधारणस्यानुभूतिरपि अत्र प्रमाणत्वेनाङगीकृतः, एतदप्यस्य महत्त्वाधायकम् खलु। विश्लेषणात्मक सिद्धान्तं सतर्कं प्रस्तुतीकरणंस्यार्थं प्रभावी प्रयासो नूनम्। तर्केण साध्यमेव सत्यं प्रामाणिकंच अस्याः स्थापनायाः कृते न्यायदर्शनं सर्वदैव प्रासङ्गिकमिति निश्चप्रचमेव। ये जनाः तर्कमेव सत्यस्य निकषोपलं मन्यन्ते, तेभ्यो न्यायदर्शनं ज्ञानस्य प्रेरणायाश्चाजस्त्रं स्तोत्रः[१५]। सत्यपि दर्शनशास्त्रे न्यायस्य विवेचनपरिधिरियान विशालः यन्न किमपि ज्ञानक्षेत्रे तस्मादस्पृष्टमविशिष्टमिति।

प्रमाणमीमांसाक्षेत्रे न्यायदर्शनस्य प्रस्थानमस्ति यज्ज्ञानं तावन्निरर्थकमेव भवति, यावतस्य प्रामाण्यं फलप्राप्तौ व्यावहरिक जीवने वा नावधार्यते। भारतीयानां तर्कशास्त्रज्ञानां मते ज्ञानं सदैव निश्चयन रूपेनुव्यवसाये परिणमति तदैव तस्य प्रामाण्यमवगम्यते । वस्तुसंवादित्वमेव सत्यस्य स्वरूपम् इत्येष विचारों न केवलं प्रमाणमीमांसादृष्टया अपितु आचारमीमांसादृष्टयापि प्रासङ्गिकः प्रतिभाति।

इदमप्युल्लेखनीयं न्यायवैशेषिकयोर्बाह्यविश्वस्य तत्रापि चानन्तानां दृश्यवस्तूनां अस्तित्वमेव न परं ज्ञेयत्वमभिधेयत्वं चापि पूर्वतः स्वीकृत्य तत्र न किंचिदप्यज्ञेयमनिर्वचनीयंम् च मतम्। तौ तु सर्वमपि स्वसिद्धान्तं व्यवहारपेक्षयैव प्रकटयतः इन्द्रियैरूपलभ्यमानं ज्ञानं प्रामाणिकमिति न्यायवैशेषिकयोः वस्तुवादि मतमद्यापि वस्तुवादिभ्यो प्रासंगिकमेव। विविधाः विचारधाराः प्रचलन्ति। धर्मग्रन्थेषु तु प्रायः आस्थारूपं स्वानुभूत्येकमानं तन्न न गृह्यते न तर्कस्यावश्यक्तानुभूयते अवसरो वा दीयते। परम् अधुनिके युगे यदा मनुष्यः स्वात्मन्यपि सन्दिहानः विश्वासरहितस्संजातस्तदा केवलं तदेव दर्शनं विश्वसनीयं ग्राह्य भवितुं शक्यते, यत्तर्काश्रितं सामान्यजनानुभावानुकूलंच भवेत्। अतोऽद्य यदीश्वरस्यास्तित्त्वमि तर्कपूर्वकं न सिद्धयति तर्हि संशयालवो मानवस्तत्रास्थां न धारयिष्यन्ति। भारतीयदर्शनेतिहासे ईश्वरसिद्धये न्याय– वैशेषिकाभ्यामेव सर्वप्रमुखभूतपूर्वं प्रयासो विहितः। उदयनाचार्यस्य न्यायकुसुमांजलिः तर्कमात्र प्रमाणपराणां नास्तिकमतानामपि जनानां चेतस्सु ईश्वरस्तित्त्व सिद्धिप्रकाशं कर्तुं क्षमा।[१६] तत्र प्रयुक्ता अष्टौ युक्तयश्च विश्वदर्शनेप्रतिमा ऐश्वरसिद्धयै। अतोऽस्मिन् क्षेत्रेन्यायवैशेषिकयोर्महत्त्वमुपादेयत्वंचासन्दिग्धं सिद्धयति। अन्येषां भारतीयदर्शनामिव न्यायवैशेषिकावपि अपवर्गम् एव चरमलक्ष्यत्वेन स्वीकुरूतः परं तत्रापीयान् विशेषो यदन्ये दार्शनिकस्तु केवलं तत्वज्ञानमेव साधनतया स्वीकुर्वन्ति न्यायवैशेषिकौ च ज्ञानकर्मसमुच्चयमेव साधनरूपेण निर्धारयते । वेदविहितस्य धर्मस्य श्रवणमननाभ्यां सहैव पदार्थतत्त्वज्ञानं निःश्रेयस्साधनमिति प्रतिपादयतः तत्र धर्मकर्मयोर्निरूपणंच सर्वथा व्यावहारिकरूपेणैव विहितमस्ति केचन् सामान्यधर्माः अपरे च विशेषधर्माः वर्णितास्सन्ति। शरीरेण दानं, परित्राणं, अस्पृहा,श्रद्धा चेति शुभाः प्रवृत्तयः[१७] धर्मे श्रद्धा अहिंसा भूतहितत्वं सत्यवचनम्, अस्तेयं, अनुपधा क्रोधवर्जनं अभिषेचनं उपवासोऽप्रमादश्च सामान्यधर्मा[१८] वर्णिताः। एते सामान्यधर्माः किमद्यापि सर्वमानवैः न पालनीयाः?

न्यायवैशेषिकयोः **परमाणुवादः** यद्यप्यधुना वैज्ञानिकसिद्धान्तानाम् प्रकाशेन पुनर्विचारणीयाः तथापि विचारशास्त्रे तु ऐतिहासिकदृष्ट्या दर्शनशास्त्रे च विश्वस्य व्याख्याप्रसंगे व्यावहारिकदृष्ट्यापि उपयोगिता अध्येयास्ति। परमाणुवादेनैव विश्वस्यैका भव्या व्याख्या,विचाराणां तार्किक संयोजने सह प्रस्तुता। परमाणु सिद्धौ च न्यायवैशेषिकाचार्यैः ये दृष्टान्तः याश्च युक्तयः प्रयुक्तास्ताः खलु सर्वथानुभवसिद्धाः विश्वसनीयंच वर्तन्ते। नेदं विस्मर्त्तव्यं यत् न्यायवैशेषिकाभ्यामेव प्रथमं परमाणुवादः प्रस्तुतः गभीरया अबाधितया च पद्धत्या अयं वैज्ञानिको सिद्धान्तः विकसितः अध्यात्मवादिनमाघातैश्च सततं सुरक्षित[१९] । अतः अनेनापि तयोरूपादेयत्वं सिद्धयति।

अद्यत्वं दर्शनक्षेत्रे भाषिकविश्लेषंचातीव महत्त्वपूर्णं स्थानमादधति तत्रापि न्यायवैशेषिकयोरध्ययनं प्रभूतं प्रासङ्गिकं वर्तते[२०]। शब्दप्रमाणविवेचने शब्दः आकाशस्य गुणः श्रोत्रेन्द्रियग्राह्यः वीचीतरंगन्यायेन कदम्बमुकुलन्यायेन वा दिक्षु तस्य प्रसरणं शब्दशक्तयः शब्दशक्तयः शब्दार्थयोसम्बन्धः संकेतग्रहः शब्दप्रमाण्यंचेति सर्वेऽपि विषयाऽद्यापि भाषाविज्ञाने दर्शनशास्त्रे च प्रासंगिकतया पर्यालोचत्येव।

वस्तुतोऽधुना भौतिके युगे यदा बाह्यविश्वं भूतपदार्थं पर्यावरणं वा प्रति सचेतना उद्बुद्धाभिलक्ष्यते केवलं विश्वात्मनो ब्रह्मणो विषये च चर्चा नौपयिकि प्रतीयते, तदा न्यायवैशेषिकौ प्रासंगिकावेव यौ हि प्राकृतिकदर्शनपरौ सम्प्रदायौ[२१] कथ्येते–अन्तरंगविश्वतश्च् बाह्यविश्वमेव प्रधानतया परिचिन्तयतः, एकस्य विश्वात्मनस्थाने चाऽनन्तान् विशिष्टान जीवान् स्वीकुरूतः अतैव खलु तयोः उपादेयत्वम्। इमे दर्शने सामान्यजनानामनुभवे सम्पृक्ते स्तः तयोः कृते दर्शनशास्त्रे न केवलं बौद्विको विनोदो वर्तते अपितु जगति अतिमहत्त्वपूर्णं व्यावहारिक प्रयोजनं साधयितुं प्रवृत्ता व्यावहारिकं विद्या खलु। अतैव तयोः प्रासङ्गिकत्वम् एतेन भारतीयदर्शनपरम्परायां मुक्तचिन्तनोद्वलितहेतुवादमहिमा सिद्धयति न्यायशास्त्रे तु पुनस्तर्कस्यैव महत्त्वं प्रतिपदं प्रतिपादितमिति न संशयः। एवं धर्मानुबन्धि सदपि भारतीयदर्शनं तर्काश्रितं सदैव विकासमभजत।

**निष्कर्षः**

समासतो निष्कर्षरूपेणेदं सुवचं यदद्यतने तर्कप्रधाने वैज्ञानिके संक्षेपीकरणयुगे न्यायवैशेषिकयोः प्रासङ्गिकमुपादेयत्वं च निश्चप्रचमेवेति।

**पाद टिप्पणियाँः**

१. तस्याः पृथक्स्थानाः संशयादयः पदार्थाः। तेषां पृथग्वचनमन्तरेणाध्यात्मविद्यामात्रमियं स्यात्यथा उपनिषदः, न्या॰ भा॰ १.१.१ सूत्रे
२. आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः, अ॰शा॰ २/१
३. अ॰शा॰ २/११
४. यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः, वै॰सूत्र १/१/२
५. न्या॰ भा॰ १/१/१ सूत्रे
६. न्या॰ वा॰ ता॰ टी २/१/३६
७. तत्त्वचिन्तामणिः,१
८. न्यायसूत्र१.१.१
९. वै.सू.१.१.४
१०. न्याय भा.१.१.१सूत्रात् पूर्वं
११. तत्रैव १.१.१सूत्रे
१२. Williams, Monier, Indian wisdom, p.६०
१३ न्याय.भा. १.१.२सूत्रे
१४. मनुस्मृति, १२.१०६
१५. न्याय.मं.,द्वितीयः अध्यायः पृ. १५७
१६. न्यायकन्दली, पृ. ३०
१७ वै.सूत्र ३.२.२०–२१
१८. प्र.पा. भा. पृ॰ २०३
१९. Gangopadhyaya, M.K, Indian Atomism, p,५४
२०. भट्टाचार्य, गोपिकामोहन, न्यायदर्शन तथा आधुनिक भाषाशास्त्रीय चिन्तन पृ॰ १८–२४
२१. Nature philosophical school, Frauwallner E, history of Indian philosophy vol. २nd p.११

**सन्दर्भ ग्रन्थ सूचीः**

१ डा॰ स्वामी राघवाचार्य वेदान्ती, भारतीयदर्शनेषु कैवल्यावधारणा।
२ गौड शशिबाला , दर्शनशास्त्रस्येतिहास, चौखम्बा सुरभारती प्रकाशन।
३ शंकर चैतन्य भारती, दर्शनसर्वस्व, संन्यासी संस्कृत कालेज, वाराणसी।
४ फतेह सिंह, वैदिक दर्शन, इलाहाबाद।
५ कामेश्वर नाथ मिश्र, षड्दर्शनसमुच्चय।
६ दीनानाथ शुक्ल भारतीयदर्शन परिभाषा कोश, प्रतिभा प्रकाशन।
७ शिवशंकर गुप्ता, भारतीय दर्शन का सुगम परिचय, विश्वविद्यालय प्रकाशन।
८ श्रीकोषः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।